दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-135 | 1 | मार्च 07, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ बसन्त-ऋतुः
सूर्यः उत्तरायणम् चैत्रकृष्णचतुर्थी
फाल्गुण 23 प्रविष्ठांशः मङ्गलमयः भवेत्

2 नूतन-सत्रे राष्ट्रिय-शिक्षा-नीत्यनुसारं स्नातक- पाठ्यक्रमाः आरप्स्यन्ते; शिक्षकानां ३८९ पदानां पूरणं भविष्यति- शिक्षामंत्री

3 हिमाचलप्रदेशे सीबीएसई-विद्यालयेषु शिक्षकाणां ५,६२३ पदानां कृते ९,६२९ आवेदनानि, ७,४४८ जनैः शुल्कमपि प्रदत्तम्

4 वैदिकगणितस्य माध्यमेन गणितशिक्षणं सरलम् कुमारभास्करवर्मसंस्कृतपुरातनाध्ययन-विश्वविद्यालये पूरबी दासः महोदयायै 'विद्यावारिधिः' उपाधिः

## उत्तराखण्डस्य विश्वप्रसिद्धायाः चारधाम यात्रायाः कृते पञ्जीकरणं समारब्धम्

**हिमसंस्कृतवार्ताः** - उत्तराखण्डस्य विश्वप्रसिद्धायाः चारधाम यात्रायाः कृते अन्तर्जालीय पञ्जीकरणं समारब्धम्। भक्ताः पर्यटनविभागस्य आधिकारिकं जालपुटके रजिस्ट्रेशन-एंड-टूरिस्ट-केयर.uk.gov.in तथा मोबाइल ऐप् टूरिस्ट केयर उत्तराखण्ड इत्यनेन पञ्जीकरणं कर्तुं शक्नुवन्ति। पर्यटनसचिवः धीरज गर्ज्यालः अवदत् यत् अस्मिन् वर्षे अप्रैल-मासस्य ऊनविंशति दिनाङ्के चारधाम यात्रा आरभ्यते। तस्मिन् एव दिने यमुनोत्रीदेवालयस्य, गङ्गोत्रीदेवालयस्य च द्वाराणि भक्तानां कृते उद्घाट्यन्ते। केदारनाथमन्दिरस्य द्वाराणि अप्रैल द्वाविंशति दिनाङ्के उद्घाट्यन्ते, बद्रीनाथमन्दिरस्य द्वाराणि अप्रैल त्रयोविंशति दिनाङ्के उद्घाट्यन्ते। चारधामयात्रायां भागं ग्रहीतानां तीर्थयात्रिणां कृते पञ्जीकरणम् अनिवार्यं कृतम् अस्ति।

## वर्तमानस्य अनिश्चिततायाः युगे प्रासङ्गिकतायाः सज्जतायाः च एकमात्र-मार्गः आत्मनिर्भरता एव रक्षामन्त्री



**हिमसंस्कृतवार्ताः** - रक्षामन्त्री राजनाथसिंहः अवदत् यत् वर्तमानस्य अनिश्चिततायाः युगे प्रासङ्गिकतायाः सज्जतायाः च एकमात्र-मार्गः आत्मनिर्भरता एव अस्ति । पश्चिमबङ्गप्रदेशस्य कोलकाता-नगरे सागरसङ्कल्पः-रिक्लाईमिङ्ग इंडियास् मैरिटाईम ग्लोरी इति रक्षा-समुद्रीय-संवादस्य उद्घाटनानन्तरं श्रीसिंहः एतत् उक्तवान्। सः अधोरेखितवान् यत् वर्तमान-वैश्विक-परिस्थित्या आपूर्तिशृङ्खलायाः साक्षात्कारः, नूतनानां समीकरणानां निर्माणं, समुद्रीयक्रियाकलापानां निरन्तरं वृद्धिः च अभवत् । मन्त्री प्रत्येकस्मिन् क्षेत्रे स्वावलंबनस्य सर्वकारस्य संकल्पं पुनः दृढीकृतवान्।

संघलोकसेवायोगस्य (UPSC) २०२५ इत्यस्य वर्षस्य अन्तिमपरीक्षापरिणामः घोषितः,

## योग्यतासूच्यां अनुज अग्निहोत्री प्रथमस्थानं प्राप्तवान्




**हिमसंस्कृतवार्ताः - डॉ नरेन्द्रराणा सिरमौरः ।** संघलोकसेवायोगेन (UPSC) नागरिकसेवापरीक्षा-२०२५ इत्यस्याः अन्तिमः परिणामः उद्घोषितः। अस्मिन् वर्षे आहत्य ९५८ अभ्यर्थिनः विभिन्नसेवाभ्यः संस्तुताः। एतेषु **६५९** पुरुषाः तथा **२९९** महिलाः सम्मिलिताः सन्ति । योग्यतासूच्यां **अनुज अग्निहोत्री** प्रथमस्थानं प्राप्तवान्। **राजेश्वरी सुवे** द्वितीयस्थानं तथा **अकांश ढुलः** तृतीयस्थानं प्राप्तवन्तः। ज्ञातव्यमस्ति यत् मईमासस्य पञ्चविंशतिः दिनाङ्के आयोजितायाम् अस्यां प्रारम्भिकपरीक्षायां ९ लक्ष ३० सहस्राधिकाः अभ्यर्थिनः आवेदनं कृतवन्तः आसन् । अस्मिन् वर्षे सफलेषु अभ्यर्थिषु महिलानां संख्या (२९९) प्रायः ३१% अस्ति, यत् प्रशासनिकसेवासु वर्धमानां महिलानां सहभागितां प्रदर्शयति । ९.३ लक्ष आवेदकेषु केवलं ९५८ अभ्यर्थिनां चयनं परीक्षायाः काठिन्यं सूचयति। सफलतायाः दरः प्रायः ०.१% एवास्ति । प्रथमत्रिस्थानेषु आगताः अभ्यर्थिनः अधुना देशस्य आगामी-नीतिनिर्धारणे प्रशासने च महत्त्वपूर्णां भूमिकां निर्वक्ष्यन्ति।

## प्रधानमन्त्रिणा नरेन्द्रमोदिना निर्यातम् उद्दिश्य रसायनमुक्तं प्राकृतिक-कृषेः आह्वानं कृतम्

### रसायनमुक्तं प्राकृतिक-कृषिः

**हिमसंस्कृतवार्ताः** - कृषिः भारतीय-अर्थव्यवस्थायाः मेरुदण्डः, दीर्घकालीनविकास-यात्रायाः महत्त्वपूर्णः स्तम्भः च अस्ति इति प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तम्। कृषिः तथा ग्रामीणपरिवर्तनम् इत्यस्मिन् विषये आयव्ययक वेबिनार इत्यस्य अनन्तरं आयोजितां वेबिनार-चर्चाम् आभासीयमाध्यमेन सम्बोधयन् श्रीमोदी अवदत् यत् कृषिक्षेत्रं सुदृढीकरणाय सर्वकारेण नियमितरूपेण अनेकानि उपायानि कृतानि सन्ति। सः अवदत् यत् अस्मिन् वर्षे केन्द्रीय-आयव्ययके कृषिक्षेत्रं ग्रामीणपरिवर्तनं च शक्तिं प्रदत्तास्ति। श्रीमोदी अवदत् यत्, भारते सम्प्रति अन्नधान्यानां, द्विदलानां, तैलबीजानां च उत्कृष्टोत्पादनं भवति । प्रधानमन्त्री श्रीमोदी, निर्यातस्य विषये विशिष्टावधानेन सह, रसायन-मुक्तकृषिं प्राकृतिककृषिं च सुदृढीकर्तुम् आग्रहम् अकरोत्। सः अवदत् यत् केन्द्रीय-आयव्ययके षड्विंशत्यधिक द्विसहस्र सप्तविंशत्यधिक द्विसहस्रयोः मध्ये उच्चमूल्ययुत-कृषि उत्पादानां विषये अपि विशिष्टावधानं प्रदत्तम् अस्ति। श्रीमोदी वर्यः अवदत् यत् प्रायः दशकोटिः कृषकाः प्रधानमन्त्री-किसान-सम्मान-निधि-योजनायाः अन्तर्गतं चतुर्लक्ष-कोटिरूप्यकाधिकानि धनानि प्राप्तवन्तः। श्रीमोदी अवदत् यत् सर्वकारेण प्रायः नवकोटि-कृषकाणां परिचयपत्राणां डिजिटलीकरणं कृतम्। प्रधानमन्त्रिणा उक्तं यत्, सर्वकारः कृषिकार्ये प्रौद्योगिकीति आनेतुं प्रबलं महत्त्वं प्रददति। श्रीमोदी ख्यापितवान् यत् सर्वकारेण त्रि-कोटि-लखपति-दीदी इति निर्माणस्य लक्ष्यं सफलतया प्राप्तमस्ति तथा च देशे ऊनविंशत्यधिक द्विसहस्रतम वर्षपर्यन्तं इतोऽपि त्रि-कोटि-लखपति-दीदी योजयितुं लक्ष्यं निर्धारितम् अस्ति । सत्रेषु पशुपालन-मूल्यशृङ्खलायां निजीक्षेत्रस्य निवेशः उद्यमशीलता च, जलाशयानां एकीकृतविकासः, मत्स्यपालनाय अमृतसरोवर इत्यादिनां विषयेषु ध्यानं दीयते। तथैव, स्वसहायता-उद्यमानां माध्यमेन ग्रामीण महिला उद्यमिनः निर्मितानां उत्पादनानां आपण-प्रवेशं वर्धयितुं अपि चर्चा भविष्यति।

## सुभाषितम्

**कर्मशीलगुणाः पूज्याः,**
**तथा जातिकुलेन हि।**
**न जात्या न कुलेनैव,**
**श्रेष्ठत्वं प्रतिपद्यते।।**
**(शुक्रनीतिः- २/५६)**

अर्थात्- कर्म, शील व गुण से मनुष्य जैसा पूज्य होता है, वैसा जाति और कुल से नहीं, क्योंकि श्रेष्ठता तो न जाति से प्राप्त होती है न ही कुल से।

दैनिकं ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## इण्डिगो इत्यनेन अस्य मासस्य एकत्रिंशत् दिनाङ्कपर्यन्तं पश्चिमेशिया-देशात्, इस्तान्बुल-देशात् च यात्रार्थं निःशुल्कं निरस्तीकरणं विस्तारितम्




**हिमसंस्कृतवार्ताः** - पश्चिमेशियायां प्रवर्तमान-स्थित्याम्, इण्डिगो विमान-संस्थया निरस्तिकरणानां कृते निःशुल्क-मुक्तेः घोषणा कृतास्ति। एकस्मिन् वक्तव्ये, इण्डिगो इत्यनेन उक्तं यत् पश्चिमेशियादेशैः इस्तान्बुल्-देशात् च यात्रार्थं, अस्य मासस्य एकत्रिंशत् दिनाङ्कपर्यन्तं, निरस्तिकरणानां विषये पूर्ण-मुक्तेः निर्णयः कृतः अस्ति । विमानसंस्थया यात्रिभिः सूचितं यत् यदि ते यात्रां कर्तुं इछन्ति एव तर्हि विमानस्य स्थितिं अवश्यमेव पश्यन्तु । अधिकं स्पष्टीकरणार्थं यात्रिनः ग्राहकसम्पर्ककेन्द्रे सम्पर्कं कर्तुं शक्नुवन्तीति इण्डिगो इत्यनेन उक्तम्।

# नूतन-सत्रे राष्ट्रिय-शिक्षा-नीत्यनुसारं स्नातक- पाठ्यक्रमाः आरप्स्यन्ते; शिक्षकानां ३८९ पदानां पूरणं भविष्यति- शिक्षामंत्री



शिक्षा मन्त्री रोहितठाकुरः शुक्रवासरे राष्ट्रिय- शिक्षा- नीतिः (NEP)-2020 इत्यस्य कार्यान्वयनाय सङ्घटितस्य राज्यस्तरीय- कार्यबलस्य (Task Force) उपवेशनस्य अध्यक्षतां कृतवान्, उच्चशिक्षायाः सुदृढीकरणाय च आवश्यक- दिशानिर्देशान् दत्तवान्। सः अधिकारिणः शिक्षाविदः च हिमाचलप्रदेश- विश्वविद्यालय- शिमला तथा सरदार- पटेल- विश्वविद्यालय- मण्डी इत्यनयोः सम्बद्धेषु राजकीय- महाविद्यालयेषु एनईपी-२०२० प्रभाविरूपेण कार्यान्वितुं सूचितवान्। शिक्षामन्त्री अवदत् यत् राज्यस्य उच्चशिक्षाव्यवस्थां राष्ट्रिय- शैक्षणिक- संरचनानुसारं परिवर्तयितुम् आवश्यकम् अस्ति। स्नातकोत्तरस्तरे सत्र-प्रणाली (Semester System) पूर्वमेव सफलतया प्रचलति, अधुना स्नातकस्तरे अपि अस्याः प्रयोगेण छात्राः गुणवतापूर्णशिक्षां श्रेष्ठां व्यवस्थां च प्राप्स्यन्ति।

## महाविद्यालयेषु ३० दिनाभ्यन्तरे परीक्षापरिणामाः घोषयितुं शक्यन्ते

रोहितठाकुरः विश्वविद्यालयान् महाविद्यालयान् च तात्कालिक- मूल्याङ्कनं (Technical Evaluation), स्थल- मूल्याङ्कनं तथा सुदृढ- आन्तरिक- मूल्याङ्कन- प्रणालीं स्वीकर्तुं निर्देशितवान्। अनया व्यवस्थया विश्वविद्यालयाः ३० दिनाभ्यन्तरे परीक्षापरिणामान् घोषितुं शक्ष्यन्ति, येन विलम्बः न भविष्यति पारदर्शिता च वर्धिष्यते। सः २०२६-२७ शैक्षणिकसत्रात् नूतनपाठ्यक्रमान् आरब्धुं निर्देशं दत्तवान्, येषु त्रिवर्षीयः स्नातक- कार्यक्रमः, चतुर्वर्षीयः ऑनर्स/ ऑनर्स विद् रिसर्च कार्यक्रमः, पञ्चवर्षीयः एकीकृत- स्नातक- स्नातकोत्तर-।कार्यक्रमः च सम्मिलिताः भविष्यन्ति।

## उच्चशिक्षाविभागे शिक्षकानां ३८९ पदानि पूरयिष्यति सर्वकारः

सः संप्राप्ति-(LOCF) आधारितपाठ्यक्रमस्य तथा व्यावसायिकशिक्षा-कौशलविकास- इण्टर्नशिप-आधारितपदवीकार्यक्रमाणां उपरि बलं दत्तवान् येन छात्राः रोजगारोन्मुखीं शिक्षां प्राप्तुं शक्नुयुः। शिक्षामन्त्री अघोषयत् यत् सर्वकारः शीघ्रमेव उच्चशिक्षाविभागे ३८९ शिक्षकपदानि पूरयिष्यति, अस्य प्रस्तावः राज्यलोकसेवा-आयोगाय प्रेषितः अस्ति।

## ७५ तः न्यूनसंख्याकाणां छात्राणां महाविद्यालयानां युक्तिकरणं भविष्यति

येषु महाविद्यालयेषु छात्रसंख्या ७५ तः न्यूना अस्ति, तेषां युक्तिकरणं कर्तुं निर्देशः दत्तः येन आधारभूत- संरचनायाः समुचितः उपयोगः भवेत्। रोहितठाकुरः उक्तवान् यत् विश्वविद्यालयाः शिक्षायाः सर्वोच्चमन्दिराणि सन्ति, सर्वकारः च छात्रेभ्यः कौशल- आधारितशिक्षां दातुं प्रयत्नशीलः अस्ति। हिमाचलप्रदेशः उच्चशिक्षायाः सकल- नामाङ्कन-अनुपाते (GER) देशस्य अग्रणीराज्येषु अन्यतमः अस्ति।

## विश्वविद्यालयानां महाविद्यालयानां च सर्वासु अभ्यर्थनासु सहानुभूतिपूर्वकं विचारः भविष्यति- राकेशकँवरः

अस्मिन् अवसरे सचिवः राकेशकँवरः अवदत् यत् विश्वविद्यालयानां समस्यानां समाधानार्थं सकारात्मकपदक्षेपाः स्वीकरिष्यन्ते। उच्चशिक्षायाः निदेशकः डॉ. अमरजीत कुमारशर्मा वर्तमानस्थितेः विषये विस्तृतां प्रस्तुतिं दत्तवान्। अस्मिन् उपवेशने हिमाचलप्रदेशविश्वविद्यालयस्य कुलपतिः डॉ. महावीरसिंहः, सरदार-पटेल- विश्वविद्यालयस्य कुलपतिः डॉ. ललितकुमार अवस्थी चापि स्वपरामर्शान् दत्तवन्तः। उपवेशने विविधाः विद्वांसः, प्राचार्याः, वरिष्ठाधिकारिणः च उपस्थिताः आसन्।

# कविन्द्रगुप्तः हिमाचलप्रदेशस्य नूतनः राज्यपालः नियुक्तः, शिवप्रतापशुक्लः तेलंगानाप्रांतस्य दायित्वं प्राप्नोति



हिमसंस्कृतवार्ताः शिमला। .केन्द्रशासितप्रदेशस्य लद्दाखस्य उपराज्यपालः जम्मूनगरस्य कविन्द्रगुप्तः अधुना हिमाचलप्रदेशस्य राज्यपालः भविष्यति। हिमाचलप्रदेशस्य वर्तमानः राज्यपालः शिवप्रतापशुक्लः अधुना तेलंगानाराज्यस्य राज्यपालत्वेन नियुक्तः। देहली-नगरस्य उपराज्यपालः विनयकुमारसक्सेना कविन्द्रगुप्तस्य स्थानं ग्रहिष्यति।राष्ट्रपतिः द्रौपदी मुर्मु त्रिषु राज्येषु नूतनानां राज्यपालानां नियुक्तिं कृतवती, अपि च केषाञ्चन स्थानान्तरणमपि कृतम्। राष्ट्रपतिभवनात् निर्गतायां प्रेस-विज्ञप्तौ उक्तं यत् पश्चिमबङ्गस्य राज्यपालः डॉ. सी. वी. आनन्द बोस यः गुरुवासरे स्वपदात् त्यागपत्रं दत्तवान्, तस्य त्यागपत्रं राष्ट्रपतिना स्वीकृतम्। तस्य स्थाने आर. एन. रवि पश्चिमबङ्गस्य राज्यपालत्वस्य अतिरिक्तदायित्वं स्वीकरिष्यति। रविः वर्तमानकाले तमिलनाडुराज्यस्य राज्यपालः अस्ति।लद्दाखस्य उपराज्यपालः कविन्द्रगुप्तः स्वस्य त्यागपत्रं दत्त्वा किञ्चित्कालानन्तरम् एव तस्य पदोन्नतेः समाचारः प्राप्तः। सः १८ जुलाई २०२५ दिनाङ्के तृतीयः उपराज्यपालरूपेण शपथं स्वीकृतवान् आसीत्। सः अष्टमासात् अपि न्यूनकालं यावत् लद्दाखस्य उपराज्यपालः आसीत्।तेलंगानाराज्यस्य राज्यपालः जिष्णुदेव वर्मा अधुना महाराष्ट्रराज्यस्य राज्यपालत्वेन नियुक्तः। बिहारस्य वरिष्ठः भाजपानेता नंदकिशोरयादवः नगालैंडराज्यस्य राज्यपालत्वेन नियुक्तः, तथा सेवानिवृत्तः सैन्याधिकारी लेफ्टिनेंट जनरल सैयद अता हसनैन बिहारस्य राज्यपालः नियुक्तः। आपदाप्रबन्धनप्राधिकरणस्य सदस्यः हसनैनः बिहारस्य राज्यपालरूपेण आरिफ मोहम्मद ख़ान इत्यस्य स्थाने दायित्वं स्वीकरिष्यति।

## कविन्द्रगुप्तस्य दीर्घः राजनीतिकः अनुभवः-

कविन्द्रगुप्तः १९७८ वर्षे विश्वविद्यालयस्य पंजाब- एककस्य सचिवः अभवत्। वर्षे १९९३ तु सः भाजयुमो- संगठनस्य प्रदेशाध्यक्षः नियुक्तः। २००५ वर्षे जम्मूनगरनिगमस्य महापौरः अभवत्। २०१५ वर्षे जम्मू-कश्मीरविधानसभायाः अध्यक्षः नियुक्तः, तथा २०१८ वर्षे जम्मू-कश्मीरराज्यस्य उपमुख्यमन्त्री अपि अभवत्।हिमाचलप्रदेशस्य राज्यपालत्वस्य दायित्वं प्राप्त्वा कविन्द्रगुप्तः अवदत्- “अहं राष्ट्रपतिं, प्रधानमन्त्रिणं, गृहमन्त्रिणं च प्रति स्वस्य हार्दिकां कृतज्ञतां व्यक्तीकरोमि।”

# नाहननगरे भविष्यति राज्यस्तरीयम् अन्तार्राष्ट्रीय- महिला- दिवस- समारोहम्; मुख्यमन्त्री सुक्खूः भविष्यति मुख्यातिथिः

हिमसंस्कृतवार्ताः- शिमला। सिरमौरस्य नाहननगरे अन्तार्राष्ट्रीय- महिला- दिवसस्य उपलक्ष्ये राज्यस्तरीय-समारोहस्य आयोजनं करिष्यते। मार्च-मासस्य अष्टमे दिनाङ्के आयोज्यमाने अस्मिन् कार्यक्रमे हिमाचलप्रदेशस्य मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः मुख्यातिथिरूपेण उपस्थितः भविष्यति। सामाजिक- न्याय- अधिकारिता- विभागे महिला- बाल- विकास- निदेशालयेन च आयोजितोऽयं समारोहः प्रदेशस्य दशसहस्रं महिलानां प्रतिभागितायाः साक्षी भविष्यति। विभागस्य प्रवक्तुः अनुसारम्, अस्य आयोजनस्य मुख्योद्देश्यं महिलानाम् अधिकाराणाम्, सम्मानस्य, सशक्तीकरणस्य च प्रति प्रतिबद्धतां सुदृढीकरणम् अस्ति। प्रवक्ता सूचितवान् यत् अस्मिन् कार्यक्रमे समग्रप्रदेशात् प्रायः १०,००० महिलाः भागं ग्रहीष्यन्ति, येषु अङ्गनबाड़ी- आशा- कार्यकर्त्र्यः, महिलामण्डलसदस्याः, पञ्चायतीराजसंस्थानां तथा शहरी- निकायानां च प्रतिनिधयः सम्मिलिताः सन्ति। एषः समारोहः महिलानां ऐतिहासिक- सङ्घर्षाणाम्, उपलब्धीनां, समाजे च तासां अमूल्ययोगदानस्य सम्मानार्थम् अस्ति। सहैव शिक्षा, स्वास्थ्यं, पोषणं, आर्थिक-स्वावलम्बनं सुरक्षा च इत्यादिषु क्षेत्रेषु लैङ्गिक-समानतां महिला- सशक्तीकरणं च प्रवर्धयितुम् अयम् एकः प्रयासः अस्ति।

अस्मिन् राज्यस्तरीय-कार्यक्रमे विभिन्नविभागानां प्रदर्शनी, विशेष-वीथिकाः (Stalls) अपि स्थापयिष्यन्ते। एतासु वीथिकासु महिला- स्वयं- सहायता- समूहैः निर्मितानाम् उत्पादानां प्रदर्शनं भविष्यति, येन तासां उद्यमिता-कौशलस्य विकासः भविष्यति, स्थानीय-उत्पादानां च कृते नूतन- विपणन- अवसराः उपलप्स्यन्ते।



# हिमाचलप्रदेशे सीबीएसई-विद्यालयेषु शिक्षकाणां ५,६२३ पदानां कृते ९,६२९ आवेदनानि, ७,४४८ जनैः शुल्कमपि प्रदत्तम्



**हिमसंस्कृतवार्ताः** शिमला। हिमाचलप्रदेशस्य राजकीयविद्यालयेषु सीबीएसई- पाठ्यक्रमस्य प्रवर्तनार्थं शिक्षक-भर्त्याः प्रक्रिया प्रचलति। प्रदेशस्य १४५ राजकीयविद्यालयेषु विभिन्नवर्गीयेषु ५,६२३ शिक्षकपदेषु नियुक्तये अधुना पर्यन्तं केवलं ९,६२९ आवेदनानि विद्यालय- शिक्षाबोर्डस्य समीपम् आगतानि सन्ति। एषा संख्या प्रदेशे कार्यरतयोग्यशिक्षकाणां समग्रसंख्यया तुलना कृत्वा अत्यल्पा मन्यते। विद्यालयशिक्षाबोर्डेन २२ मार्चे भवितव्यस्य स्क्रीनिंग- परीक्षायाः कृते पूर्वं ११ फरवरीतः २४ फरवरीपर्यन्तम् आवेदनानि आमन्त्रितानि आसन्, किन्तु शिक्षकाणां न्यूनरुचिं दृष्ट्वा आवेदनस्य तिथिः ५ मार्चपर्यन्तं विस्तारिताऽभवत्। बोर्डस्य समीपं ३ मार्चपर्यन्तं प्राप्तेषु आवेदनपत्रेषु ७,४४८ जनाः एव शुल्कं समर्पितवन्तः सन्ति, यदा २,१८१ आवेदनपत्राणि शुल्काभावात् अपूर्णानि एव अवशिष्टानि सन्ति।

**प्राप्तेषु आवेदनपत्रेषु-**
लेक्चरर-भूगोल-विषये १३४ पदानां कृते केवलं ६० आवेदनपत्राणि पूर्णरूपेण पूरितानि दृश्यन्ते, तथा १३ आवेदकैः शुल्कं न समर्पितम्। लेक्चरर- समाजशास्त्र-विषये १३४ पदानां कृते केवलं २१ आवेदनानि प्राप्तानि, तेषु चत्वारः आवेदकाः अद्यापि शुल्कं न दत्तवन्तः। प्रवक्ता- मनोविज्ञान-विषये १३४ पदानां कृते केवलं ७ आवेदनानि प्राप्तानि, तेषु चत्वारः जनाः अद्यापि शुल्कं न समर्पितवन्तः। शिक्षकाणां स्क्रीनिंग-परीक्षासम्बद्धेषु आवेदनपत्रेषु न्यूनसंख्यां दृष्ट्वा आवेदनस्य अन्तिमतिथिः ५ मार्चपर्यन्तं पुनः विस्तारिताऽस्ति। अधुना पर्यन्तं प्रायः साढ़ेनवसहस्राणि आवेदनानि प्राप्तानि सन्ति, यदा आवेदनकालः अद्यापि अवशिष्टः अस्ति।

**-डॉ. मेजर विशाल शर्मा, सचिवः, विद्यालयशिक्षाबोर्डः, धर्मशाला।**

**कस्य पदस्य कृते कियत् आवेदनम्**

प्रवक्ता- जीवविज्ञानस्य कृते १५०,
प्रवक्ता- रसायनशास्त्रस्य कृते १६१,
प्रवक्ता- भौतिकशास्त्रस्य कृते १६१,
प्रवक्ता- गणितस्य कृते १६०,
प्रवक्ता- वाणिज्यस्य कृते २८८,
प्रवक्ता- अर्थशास्त्रस्य कृते १६७,
प्रवक्ता- अङ्ग्रेजी-विषयस्य कृते ३८४,
प्रवक्ता- राजनीतिशास्त्रस्य कृते १८२,
प्रवक्ता- इतिहासस्य कृते १८२,
प्रवक्ता- हिन्दी-विषयस्य कृते १८२,
प्रवक्ता- भूगोलस्य कृते १३४,
प्रवक्ता- समाजशास्त्रस्य कृते १३४,
प्रवक्ता- संस्कृतस्य कृते १३४,
प्रवक्ता- संगीतस्य कृते १३४,
प्रवक्ता- आईपी-विषयस्य कृते १३४,
प्रवक्ता- शारीरिकशिक्षायाः कृते १३४,
प्रवक्ता- मनोविज्ञानस्य कृते १३४,
प्रवक्ता- पदस्य कृते १४०,
टीजीटी-कला स्नातकस्य कृते ४८०,
टीजीटी-विज्ञान स्नातकस्य कृते २४४,
टीजीटी- नॉनमेडिकलस्य कृते २४४,
शास्त्री-पदस्य कृते २२१,
भाषाध्यापकस्य कृते २३९,
कला-शिक्षक-पदस्य कृते १७९,
शारीरिक-शिक्षक-पदस्य कृते १४७,
प्राथमिकशिक्षक- पदस्य कृते ६४० आवेदनानि प्राप्तानि सन्ति।

# अखिलभारतीय-आयुर्विज्ञान-संस्थानम् बिलासपुर संस्थाने एनेस्थिसियोलॉजी, ट्रॉमा-एण्ड-इमरजेंसी, ऑर्थोपेडिक्स न्यूरोलॉजी च विभागेषु पदानि पूरितानि




**हिमसंस्कृतवार्ताः-बिलासपुरम्।** अखिलभारतीय- आयुर्विज्ञान- संस्थानं बिलासपुरे विभिन्नविभागेषु फैकल्टी-पदानां नियुक्तेः अन्तिमपरिणामं घोषितवान्। संस्थानेन निर्गतायाः अधिसूचनायाः अनुसारं प्रोफेसर, एडिशनल- प्रोफेसर, एसोसिएट- प्रोफेसर तथा असिस्टेंट- प्रोफेसर पदानां कृते आयोजितानां साक्षात्काराणाम् अनन्तरं चयनप्रक्रिया पूर्णा कृता। अधुना चयनितेभ्यः फैकल्टी-सदस्येभ्यः कार्यग्रहण पत्राणि प्रेष्यन्ते। संस्थानेन आहत्य ८३ फैकल्टी-पदानां पूर्त्यर्थं आवेदनानि आमन्त्रितानि आसन्। एतेषां पदानां कृते अन्तर्जाल -आवेदनस्य अन्तिमतिथिः १५ जनवरी आसीत्। आवेदनप्रक्रियायाः समापनानन्तरं पात्राभ्यर्थिनां साक्षात्काराः १६ तथा १७ फरवरी दिनयोः आयोजिताः। स्थायी-चयन-समित्याः अनुशंसाभिः, संस्थानस्य एचआर-उपसमितेः अनुमत्याः अनन्तरं अन्तिमपरिणामः प्रकाशितः। प्रकाशित- परिणामानुसारम् अनेकविभागेषु विभिन्नस्तरेषु पदानि पूरितानि सन्ति। सर्जिकल- ऑन्कोलॉजी-विभागे असिस्टेंट- प्रोफेसरस्य एकं पदं पूरितम्। रेडियोलॉजीविभागे अपि असिस्टेंट- प्रोफेसरस्य एकं पदं पूरितम्। तथैव नियोनेटोलॉजी-विभागे एडिशनल- प्रोफेसरस्य एकं पदं पूरितम्। ट्रांसफ्यूजन- मेडिसिन- एण्ड- ब्लडबैंक- विभागे एडिशनल- प्रोफेसरस्य एकं पदं पूरितम्। ट्रॉमा- एण्ड- इमरजेंसी- विभागे असिस्टेंट-प्रोफेसरस्य द्वे पदे पूरिते। न्यूरोलॉजी-विभागे असिस्टेंट-प्रोफेसरस्य एकं पदं पूरितम्, नेफ्रोलॉजी-विभागे अपि असिस्टेंट-प्रोफेसरस्य एकं पदं पूरितम्। फिजिकल- मेडिसिन- एण्ड- रिहैबिलिटेशन- विभागे असिस्टेंट- प्रोफेसरस्य एकं पदं पूरितम्। ऑफ्थाल्मोलॉजी-विभागे एडिशनल-प्रोफेसरस्य एकं पदं पूरितम्। फॉरेंसिक- मेडिसिन- एण्ड- टॉक्सिकोलॉजी- विभागे एडिशनल-प्रोफेसर तथा एसोसिएट-प्रोफेसर पदयोः एकैकं पदं पूरितम्। ऑर्थोपेडिक्स- विभागे एडिशनल-प्रोफेसर-पदं अवनतं कृत्वा असिस्टेंट-प्रोफेसर (संविदा-आधारे) इत्यस्य एकं पदं पूरितम्, तथा एसोसिएट- प्रोफेसरस्य अपि एकं पदं पूरितम्। एनेस्थिसियोलॉजी-विभागे प्रोफेसरस्य एकं पदं तथा असिस्टेंट-प्रोफेसरस्य पञ्चपदानि पूरितानि सन्ति। तथापि कतिपयेषु विभागेषु पदानि अद्यापि रिक्तानि अवशिष्टानि सन्ति। नियुक्तेः पूर्वं सर्वेषां अभ्यर्थिनां शैक्षणिक-प्रमाणपत्राणां तथा अन्येषां आवश्यकप्रपत्राणां सत्यापनं क्रियते।

# ग्रीष्मकालीनविद्यालयानां वार्षिका- परीक्षाः मार्चमासस्य नवदिनाङ्कात् आरप्स्यन्ते



**हिमसंस्कृतवार्ताः- हीरालालः (कमलेशः)** हिमाचलप्रदेशस्य ग्रीष्मकालीन-विद्यालयेषु अध्ययनरतविद्यार्थिनां कृते सत्रम् २०२५–२६ सम्बन्धिन्यः वार्षिकाः परीक्षाः नवमार्चदिनात् आरप्स्यन्ते। चतुर्थकक्षायाः वार्षिकपरीक्षायाः प्रथमपरीक्षा नवमार्चदिनाङ्के भविष्यति तथा षोडशमार्चपर्यन्तं सर्वविषयाणां परीक्षायाः समाप्तिः भविष्यति। तथैव षष्ठ- सप्तमकक्षयोः परीक्षाः अपि नवमार्चदिनात् विंशतिमार्चपर्यन्तम् सम्पादिताः भविष्यन्ति। शिक्षाविभागेन परीक्षासम्बद्धः विषयवारः कार्यक्रमः पूर्वमेव सर्वान् विद्यालयान् प्रति प्रेषितः अस्ति। प्रथम- द्वितीय- चतुर्थ- षष्ठ- सप्तमकक्षाणां वार्षिकपरीक्षाः प्रातः ९:४५ वादनात् मध्याह्न १२:४५ वादनपर्यन्तम् सञ्चाल्यन्ते। प्रथमद्वितीय- कक्षयोः परीक्षाः एकादशमार्चदिनात् आरभ्य षोडशमार्चपर्यन्तं सम्पन्नाः भविष्यन्ति। शिक्षानिदेशालयेन स्पष्टतया उक्तं यत् सर्वे विद्यालयाः निर्धारित-समयसारिण्याः, निर्देशानां च सम्यक् पालनं कुर्वन्तु। विभागेन सर्वेभ्यः प्रधानाचार्येभ्यः/ मुख्याध्यापकेभ्यः निर्देशाः दत्ताः यत् परीक्षाः पारदर्शितया, शान्तिपूर्वकं, सुव्यवस्थित-रीत्या च सम्पादिताः स्युः, येन विद्यार्थिनः निष्पक्षम्, उत्तमं च परीक्षावातावरणं प्राप्नुयुः।

# केन्द्रीय-औद्योगिक-सुरक्षा-बलेन विना भारतस्य औद्योगिक-विकासः असम्भवः एव अस्ति - अमित शाहः




**हिमसंस्कृतवार्ताः** - केन्द्रीय-गृह-मन्त्री अमित शाहः अवदत् यत् केन्द्रीय- औद्योगिक सुरक्षा-बलेन (सी. आई. एस्. एफ्.) विना भारतस्य औद्योगिक- विकासः असम्भवः एव अस्ति। कटक- नगरस्य मुण्डुली-नगरे सी.आई.एस्.एफ्. इत्यस्य सप्तपञ्चाशत्तम-स्थापना दिवसोत्सवम् अभिसंबोधयन् श्रीशाहः अवदत् यत्, देशस्य प्रमुखेषु औद्योगिक- संस्थानेषु सुरक्षां सुनिश्चेतुं बलस्य महत्त्वपूर्णा भूमिका अस्ति। सः अवदत् यत् महत्त्वपूर्ण-समुद्रीय-सौकर्येषु सुरक्षां अधिकं सुदृढं कर्तुं शीघ्रमेव पत्तन-सुरक्षां सी.आई.एस्.एफ्. संस्थायै समर्पयिष्यते। माओवादिनः विरुद्धस्य युद्धस्य उल्लेखं कुर्वन्, गृहमन्त्रिणा अस्य मार्च- मासस्यान्तं यावत् भारतं नक्सल-मुक्तं भविष्यति इति आत्मविश्वासोपि प्रकटितवान्।

# वैदिकगणितस्य माध्यमेन गणितशिक्षणं सरलम्

## कुमारभास्करवर्मसंस्कृतपुरातनाध्ययनविश्वविद्यालये पूरबी दासः महोदयायै 'विद्यावारिधिः' उपाधिः



**हिमसंस्कृतवार्ता डॉ.निशिकान्तपाण्डेयः**

नलबारी (असम)। नलबारीमण्डलस्य प्रसिद्धे कुमारभास्करवर्मसंस्कृतपुरातनाध्ययन-विश्वविद्यालये प्रकाशितविज्ञप्त्या एतत् सूच्यते यत् अस्मिन् नूतनवर्षे फरवरी-मासस्य सप्तविंशतिदिनाङ्के (२७/०२/२०२६) भृगुवासरे कुमारभास्करवर्मसंस्कृतपुरातनाध्ययन-विश्वविद्यालये एकः गौरवपूर्णः कार्यक्रमः आयोजितः जातः। अस्मिन् कार्यक्रमे विश्वविद्यालयस्य शिक्षाविभागे शोधरता छात्रा श्रीमती पूरबी दास महोदया 'विद्यावारिधि' (Ph.D.) उपाधिना अलङ्कृता।श्रीमती पूरबी दासमहोदया शिक्षाविभागे विदुषी प्रो. मल्लिका कलिता महोदयायाः कुशल-मार्गदर्शने स्वकीयं शोधकार्यं पूर्णं कृतवती। तस्याः शोधस्य विषयः आसीत्— "Effectiveness of Vedic Mathematics Approach on Learning Basic Arithmetic Operations of Class VI Students" (षष्ठकक्ष्यायाः छात्रेषु मूलभूत-अङ्कगणितीयप्रक्रियाणां शिक्षणे वैदिकगणितस्य प्रभावः)।अस्मिन् शोधप्रबन्धे श्रीमती दासमहोदया दर्शितवती यत् कथमस्माकं प्राचीनवैदिकगणितस्य पद्धतयः आधुनिक-गणित-शिक्षणे अत्यन्तं सरलाः प्रभाविण्यश्च सन्ति। तस्याः एतत् शोधकार्यं सर्वैः विद्वद्भिः अतीव प्रशंसितम्।अस्मिन् गरिमामयकार्यक्रमे विश्वविद्यालयस्य कुलगुरुवः आचार्याः प्रह्लाद रा जोशीमहोदयाः मुख्यरूपेण उपस्थिता आसन्। तैः सह कुलसचिवः आचार्यः विकासभार्गवशर्मा, परीक्षा-नियन्त्रकः आचार्यः प्रशान्तज्योतिगौतमः, तथा च शोध-विकास-परिषदः निदेशकः आचार्यः रातुल बुजरबरुवा महोदयः मञ्चम् अलङ्कृतवन्तः। विशेषतः तेजपुर-विश्वविद्यालयस्य शिक्षाविभागतः पूर्वाध्यक्षः आचार्यः नील रतन रायमहोदयः अपि अस्मिन् परीक्षण-कार्यक्रमे उपस्थितः आसीत्।

इतोपि कार्यक्रमे विश्वविद्यालयस्य विभिन्नानां सङ्कायानाम् अध्यक्षाः, प्राध्यापकाः, सहाचार्याः, शोधार्थिनः च उपस्थिताः आसन्। शोध-प्रस्तुतीकरणस्य अनन्तरम् उपस्थिताः विद्वांसः शोधार्थिनीं प्रति अनेकान् क्लिष्टान् प्रश्नान् अकुर्वन्। श्रीमती पूरबी दासमहोदया स्वकीयप्रतिभया सर्वेषां जिज्ञासां सम्यक् शान्तं कृतवती, युक्तिपूर्णं समाधानं च दत्तवती।

अन्ते विश्वविद्यालयस्य कुलगुरुणा अन्यैश्च अधिकारिभिः तस्यै 'विद्यावारिधि' उपाधिः प्रदत्ता। एषा उपलब्धिः न केवलं शिक्षाविभागस्य कृते अपितु समग्र-विश्वविद्यालयस्य कृते हर्षस्य विषयः अस्ति।



हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। अद्य मया एका चित्र-वार्ता पठिता। सर्वकारेण गर्दभ-पालनाय पञ्चाशत्-लक्ष-परिमितं धन-साहाय्यम् उद्घोषितम्। तेन साहाय्येन जनाः धनवन्तः भवितुम् अर्हन्ति इति सर्वकारेण चिन्तितम्।

**नन्दिनी-** अहो, गर्दभाः अपि धन-प्राप्त्यै उपयुक्ताः इति मया न चिन्तितम्! अस्तु, मया अपरा वार्ता श्रुता। एकया विवाह-योजिकया एका महिला निषिद्धा। यतः एकादश-लक्ष-रूप्यकाणि अर्जयन्त्या तया महिलया कोटि-रूप्यकाणि अर्जयन् वरः अन्विष्टः!

**काव्या-** हा हा! तस्याः महिलायाः इच्छा अतीव विशाला खलु! इच्छा-विषये मया अन्यत् अपि दृष्टम्। एकः महा-उद्योगपतिः लुप्त- जीव- वाटिका- विषये उक्तवान् अस्ति। प्राचीन-जीवानां पुनर्जीवन-विषये तेन विचारः कृतः।

**नन्दिनी-** लुप्त-जीवानां पुनर्जीवनं तु भयङ्करं दृश्यते! भयात् स्मृतम् - आङ्ग्ल-देशे एकः पुरुषः दूरभाष-प्रकोष्ठे बद्धः जातः। यदा तेन भृष्ट- मांस- भोजनस्य आदेशः कृतः, तदा एव सः तत्र बद्धः। अन्ते रक्षक-भटैः सः रक्षितः।

**काव्या-** अहो! भोजनाय सङ्कटं प्राप्तम्! सः पुरुषः सम्यक् भोजनं खादितवान् अस्ति इति अहं मन्ये। अद्यत्वे अतीव विचित्राः घटनाः दृष्टाः।




# पाहड़ी माहणुआं तू कंह ज़ुल्म कमायादा

पाहड़ी माहणुआं तू एह क्या ज़ुल्म कमायादा पहाड़िया
जो छड्डी कने तूं कंह दूर जायादा
असांरे सारे बुजुर्ग बी पाहड़िया च ई थे गलांदे
तिन्हांरिया विरास्ता जो तूं कंह अग्गे नी बधायादा

छोटे छोटे बच्चेयाँ जो अंग्रेज़ी सिखायादा
उमरां रे चलिरे सैजे संस्कार तिन्हांजो भुलायादा
सबीं बुजुर्गे निभाये अपणे रीति रिवाज तू कंह इन्हां
रीति रिवाजां ते पीछा छुड़ायादा

स्याणे म्हारे अज्ज बी पाहड़ी ई गलायादे
पाहड़ी तिन्हांरा रहन सहन पाहड़ी खाणा खायादे
पढ़े लिखे पांवें अये घट पर बौहत आ दिमाग पाहड़िया
च गलाई कने बड़ेयाँ बड़ेयाँ जो बी समझायादे

पाहड़ी म्हारी इतनी मीठी कने प्यारी  भूलणे लगिरे
इसाजो मत गईरी मारी अपणी बोली बोली कने ई
हुन्दी तरक्की हउँ नी बोल्दा एह दुनियां ग्लान्दी सारी
पंजाबी लोग पंजाबी जम्मू वाले डोगरी गलांदे असें

पाहड़ी माहणू पाहड़ी बोलने ते कंह शर्मान्दे
अंग्रेज़िया रे फेरा च फसी गई दुनियां सारी देखा
देखिया रे गेड़ा च पाहड़ी बी आई जांदे
अंग्रेज़ी हिंदी हौ़लेयां हौ़लेयां अग्गे बधी जांदी
लोकां रा रवैया देखी कने पाहड़ी बड़ी घबरान्दी
पता नी काहलूं जे छडी देने इसा अपने प्राण मरने नी
देवा मिंजो बार बार एहड़ी.मिनतां करी जांदी



रवींद्र कुमार शर्मा
घुमारवीं जिला बिलासपुर
हि प्र 7018853800

# दृष्टिकोणस्य दीपः

एकदा कश्चन मूर्तिकारः स्वस्य टङ्केन (छेनी) मुद्गरेण (हथौड़ा) च एकं पाषाणं तक्षति स्म। तत्र मार्गेण गच्छन् कश्चित् पुरुषः अपश्यत् यत् मूर्तिकारः अतीव ध्यानेन पाषाणस्य उपरि प्रहारं करोति। सः पुरुषः अपृच्छत्, "भ्रातः! भवान् एतेन सामान्येन पाषाणेन सह एतावान् परिश्रमं किमर्थं करोति?"
मूर्तिकारः मन्दहासं कृत्वा अवदत्, "अहं परिश्रमं न करोमि, अहं तु केवलम् अस्य पाषाणस्य अन्तः स्थितां ईश्वरस्य मूर्तिं बहिः निष्कासयामि। मूर्तिः तु पूर्वमेव अस्मिन् विद्यते, अहं तु केवलं व्यर्थान् पाषाणखण्डान् दूरीकरोमि।"

## शिक्षाः

एषा एव वार्ता अस्माकं जीवने अपि अस्ति। अस्माकं सर्वेषाम् अन्ते अपाराः क्षमताः गुणाः च निहिताः सन्ति। सफलतायाः अर्थः किमपि नवीनं प्राप्तुं न, अपितु स्वस्य अन्तः स्थितानां दुष्टगुणानां व्यर्थविचाराणां च निष्कासनम् अस्ति, ये अस्माकं वास्तविकं प्रकाशं अवरुद्धवन्तः सन्ति

# हास- परिहासम्

**डॉ. विदुषी अग्रवाल**

पत्नी- कम्बलस्य पुटीकरणं करोतु।
पतिः- रात्रौ यदा पुनः प्रावरणीयम् एव, तर्हि पुटीकरणं किम्?
पत्नी- 😳
पतिः- दूरभाषं विद्युदावेशितं कुरु।
पत्नी- यदा दूरभाषः पुनः शक्तिरिक्तः भविष्यति, तर्हि विद्युदावेशितं किम्?
पतिः- 🙄
पतिः- युतकं इस्त्रीकरणं करोतु।
पत्नी- यदा युतकं पुनः सङ्कुचितं भविष्यति, तर्हि इस्त्रीकरणं किम्?




पतिः- 🙄
पतिः- बुभुक्षा अस्ति, भोजनं यच्छ।
पत्नी- यदा उदरं पुनः रिक्तं भविष्यति, तर्हि...
पतिः- तिष्ठ, तिष्ठ! अहम् अवगतवान्। अहं कम्बलं पुटीकरणं करिष्यामि, त्वं मम कृते भोजनं पच।
पत्नी: 😄 🫣 😍